आतिष्ठ्यं परमतामियामिति । ततो वै स आतिष्ठ्यं परम तामैद्यः कामयेतातिष्ठ्यं परमतामियामिति स एतेन यज्ञक्रतु यजेतातिष्ठ्यꣳ हैव[1] परमतामेति । ॥ १९ ॥ पञ्चमः ॥

सद्यस्क्रिया यक्ष्यमाणो भवति । स यूप्यं च वृक्षं छेदया लाङ्गल्यं चैषां यूप्यस्य कारयति लाङ्गलं लाङ्गल्यस्य । त सꣳहृत्य भुञ्जते वा नि[2] वा[2] दधत्यथास्यैतत्पुरस्तादेव जु देवयजने वेदिसंमितं विमितं[3] कारितं भवति । तदेते लाङ्गलेन[4] परिहार्य[4] कर्षयति । तस्मिञ्जघन्यवाप्यान्यवाप्याप यित्वा[5] परिघातयत्यथास्यैते रथा उपक्लृप्ता भवन्ति चतुर्यु प्रष्टिवाही द्वियोग[6] स्थूरिरिति[6] । तेषु काल एव दधि विनालानासञ्जयन्ति । स पौर्णमस्य जघन्याहःसु प्रजहिते यवेष्वृत्विजः पदेनाक्रापयतीष्या वा मा याजयिष्यथ भक्तं व वः कारयिष्यामीति[7] । तेषूपसमेतेषु काल एव प्रातरग्निहो जुहोत्युपसंगच्छन्त एनमेत ऋत्विजो । ऽथैनानाह सद्यस्क्रिय मा याजयतेति । तं तथेतीतरे प्रत्याहुस्तस्मै तदानीमेव

---

१ एव om. M.

२ Thus M only; न वा दधत्य॰ Be; न वा दधात्य॰ BU; निदधाति वा Be 7 DU (bis).

३ om. M.

४ Thus MUDB Be 7; ॰लेनापरि॰ Be U (bis).

५ Thus M; तस्मिन्व्रीहीन् यवान्वावापयित्वा Be 7 DU; तस्मिन् जघन्यवा- पान्यवान्वापयित्वा Be; तस्मिन्व्रीहीन्यवान्वापयित्वा B.

६ Thus M; द्वियुगस्थूरि॰ the other MSS.

७ Thus M; करिष्यामीति the other MSS.

वै ग्रैब्यो राजा पुण्ड्रकद्रूयाज्याम । स ह पापीयाञ्जनतां[१]
प्रतिहितां[१] प्रतिख्यायर्त्विजः[१] पप्रच्छास्ति स्वित्स यज्ञक्रतुर्ये-
नाहमिष्ट्वैव प्रयायामित्यस्ति[२] हौति[२] हैनमृत्विजः प्रत्यूचुस्तस्मा
अध्वर्युरयोनौनपुरोरुक्कान्[३] ग्रहान्जग्राह । स्वराण्युद्गाता
सामान्यनैडान्यनिधनानि[४] । पराङेवग्निर्मयः[५] होतानूवाच ।
स हावभृथादेवोदेत्य ममार । यं द्विष्यात्तस्यैवं यज्ञं[६] कुर्यादुप-
हृतं[७] वा याजयेत् । क्षिप्रं हैवास्माल्लोकात्प्रैति ॥ अथ राश्रिमराया-
वित्याचक्षते । चतुष्टोमे राश्रिकृतं[८] धान्यं ददाति । स राश्रि-
श्चतुष्टोम एव मरायकृतः । स मरायो ॥ ऽथाञ्जनाभ्यञ्जना-
वित्याचक्षत । आक्ताक्ता[९] अलंकृता[९] ऋत्विजः प्रचरन्ति । स

---

१ पापी (पापा) जनतां etc. as above Be L; पापीयांजानता प्रति प्रतिवा (or वीं) वर्त्विजः the other MSS.

२ प्रययामी(मि)त्यस्ति हाइ (हा) इति Be L; प्रायणमित्यास्ति हौइ इति other MSS.

३ Conjecture; °योनौनपुरोरुक्कान् Be; अयेनाप्पुरोरुक्कान् L; अयोन रुक्तान् the other MSS.

४ सामान्यनैनतृनिनिध° Be; मान्यनैनन्यनिध° L; सामान्यनैल (लास्य°) the other MSS.

५ पराङेवग्यै Be; पराङ्यग्यें L; परां (or परा) इति (or इव) दु (or घग्य the other MSS.

६ यज्ञे MSS.

७ °दुपाहृतं L.

८ राश्री° Be; राशि° the other MSS.

९ आंक्ताचालंकृता Be; आङ्क्ताकालंकृता L; आताचालंकृता other MSS.

